अध्ययने संस्काराणां महत्त्वम्

- डॉ. कृष्णचन्द्रकविः

शोधसारांशः -

मानवजीवनमतीव दुर्लभम् । संस्कारितमानवजीवनं ततोधिकमपि दुर्लभतरं वर्त्तते। विविधैः संस्कारैः मानवजीवनं सुसंस्कृतं जायते। अतोऽस्माकं पूर्वजैः तत्प्राप्तये षोड़शसंस्काराः विहिताः। गर्भाधानादिभिः संस्कारैः मानवजीवनं समुन्नतं संस्कृतं च जायते। ततः शौर्ययशसि च लभते मनुष्यः। उत्तमसंस्कारेणैव मानवः कथं विद्यामधिगच्छति कथं च अस्माभिः अनुष्ठिताः संस्काराः प्रभावमुत्पादयन्ति त एव विषयाः अत्र प्रतिपादताः सन्ति। न केवलम् अध्ययनाध्यापने मानवमात्रस्य शैक्षिकविकाशः स्यात् अपि तु उत्तसंस्कारेण सह अध्यापनं क्रियते चेत् शिक्षायाः समुन्नतिः उत्कृष्टा स्यात् इति शोधस्य आशयः ।

मनुयाज्ञवल्क्यादीनां स्मृतीनां चतुर्णां वेदानां महाभारतादीनामितिहासग्रन्थानां व्यासप्रणीतानां पुराणादीनाञ्च उद्धरणानि यथास्थानं विलिख्य अयं शोधलेखः प्रस्तुतोऽस्ति। अस्य अध्ययनेन कथं षोड़शसंस्काराः अध्ययनस्तरे प्रभावशालिनः सन्ति तत् सर्वं प्रतिभास्यन्ति इति मे मतिः।

मानव: सर्वदा यशसि अभिरुचिं स्थापयति, यश: विद्यामाध्यमेनैव लभते च। विद्या उत्तमसंस्कारै: संस्कृतानां मानवानां बौद्धिकस्तरे उत्पद्यते। प्राचीना: भारतीयमनीषिण: प्रज्ञामूर्त्तय: ऋषयश्च विषयेऽस्मिन् दृढनिश्चया: सन्त: संस्काराणामुपरि प्राधान्यं दत्तवन्त:। यस्य कस्यापि मानवस्य जन्मन: आरभ्य मृत्युं यावत् षोडशसंस्कारा: अनुष्ठीयन्ते। तेषां संस्काराणां किमाध्यात्मिकं विज्ञानसम्मतरहस्यं वर्तते अध्ययने तेषां महत्वं कथमस्ति तदेवात्र प्रतिपाद्यते।

प्राचीनेषु शास्त्रेषु संस्काराणां विषये महद्वर्णनमुपलभ्यते।. यथा षोडशकलासु परिपूर्णचन्द्रो परिपूर्णो जायते तथैव षोडशसंस्कारै: संस्कृत: मानव: जीवत्वं विहाय परमात्मनि प्रतिष्ठां प्राप्नोति इति आर्यशास्त्राणामभिमतम्। यथा लेखन्या: बहुश: प्रयोगेण चित्रकर्मण: पूर्णता जायते तथैव विधिपूर्वकं संस्काराणामनुष्ठानेन मानवेषु ब्रह्मण्यताया: विकासो जायते। सम् पूर्वक कृ धातौ क्तिन् प्रत्यये कृते "सम्परिभ्यां करोतौ भूषणे" इति पाणिनिसूत्रेण संस्कृतिशब्दस्य सिद्धि: जायते। संस्कृतिशब्दस्यापरो वाचकशब्द: संस्कार:, यस्य निष्पत्तिरपि सम् पूर्वक कृधातौ घञ् प्रत्यये कृते, सम्परिभ्यां करौतु भूषणे इत्यनेन सूत्रेण सु आगमे च सिद्ध्यति। प्रकारान्तरेणानुमीयते संस्कृतिसंस्कारशब्दयो: अर्थ: धर्ममेव बोधयति। चरित्रगठनाय संस्काराणामहत्त्वमधिकं लक्ष्यते। स्वामिविवेकानन्देन प्रोक्तमस्माकं कार्यम् अङ्गसंचालनादिकं प्रत्येकविचारश्चापि मानसोपरि संस्कारं पातयति। यद्यपि एतेषां संस्काराणाबहिरङ्गदृष्ट्या प्रभावो नोपलक्ष्यते तथापि अन्तरङ्गदृष्ट्या कार्यं करोति एव । प्रत्येकेषु मुहूर्तेषु अस्माकं परिवर्त्तनं भवति तत् सर्वं संस्कारसमुदायानां माध्यमेनैव भवति। अधुनावयं यत् किञ्चित् वक्ष्याम: तत्तु अतीतजन्मन: संस्कारस्य प्रभाव एव। यथार्थत: एनं चरित्रमित्युच्यते। प्रत्येकस्य जन्तो: चरित्रं संस्काराणां माध्यमेन नियमितं भवति। यदि मानवस्य मनसि संस्काराणां प्राधान्यता स्यात् तर्हि मनुष्यस्य चरित्रं निर्मलं भवेत्। यदि मन्दसंस्कारै: मन: आवृत्तो भवति तर्हि स मन्दकार्येषु मन: दास्यति एवं सर्वदा मन्दशब्दश्रवणेन विचारणेन चिन्तनेन मन्दकार्यसम्पादनेन च चित्तमपि मन्दसंस्कारेषु परिपूर्णो भविष्यति एवं च तस्याज्ञानतायामेव कुसंस्कारा: कर्माण्यपि प्रभावं पातयिष्यन्ति येन साधुरपि मानव: कर्मणा असाधु: भविष्यति। (कल्याण संस्कार अङ्क: पृ ७९)

संस्कारो नाम दोषाणां परिमार्जनम्। मानवानामन्तर्निहितदुर्बलताया: दूरीकरणपूर्वकं तं धर्मार्थकाममोक्षं प्रति अभिप्रेरणं संस्कारणां मूलमुद्देश्यम्। संस्कारा: कथं दोषान् मार्जयन्ति इति विषये स्फुटसिद्धान्तकथनमतीव गहनव्यापारमस्ति। यतो हि एषा मानसिकीप्रक्रिया वर्तते । यद्यप्यस्य विश्लेषणे वयमसमर्था: तथापि अस्य परिणामविषये वयं दृढनिश्चया:। संस्काराणां महत्त्वविषये आप्तवाक्यमेव प्रमाणम्। श्रद्धापूर्वकं प्राचीनमुनिऋषीणां वचसि विश्वासं प्रदर्शयन् तै: प्रतिपादितकर्मण: फलं यदि वयं पश्याम: तर्हि संस्कारा: मानवजीवने कथं प्रभावमुत्पादयन्ति तं ज्ञास्याम:। भगवता मनुना स्वयमुक्तम्-

वैदिकै: कर्मभि: पुण्यैर्निषेकादिर्द्विजन्मनाम्।
कार्य: शरीरसंस्कार: पावन: प्रेत्य चेह च।।
गार्भैर्होमैर्जातकर्मचौडमौञ्जीनिबन्धनै:।
बैजिकं गार्भिकं चैनो द्विजानामपमृज्यते।
स्वाध्यायेन व्रतैर्होमैस्त्रैविद्येनेज्यया सुतै:।
महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुम्।।[1]

अर्थात् वेदप्रतिपादितसंस्कारै: मानवानां शरीरसंस्कार: करणीय:। त्रिषु संस्कारेषु जातकर्मचूडाकरणोपनयनकर्मण्यनुष्ठितस्य होमस्य माध्यमेन मानवानां गर्भवासजन्यपापा: नश्यन्ति। एवं च स्वाध्यायव्रतवन्धनत्रैविद्योपासनयज्ञैर्महायज्ञैश्च शरीरमिदं ब्रह्मप्राप्तियोग्यं भवति। अत्र मनुना संस्काराणां महत्त्वं सामान्यतया प्रकाशितम्। केन संस्कारेण कस्य दोषस्य नाशो जायते तस्य विस्तृतं विवेचनं स्मृतिसंग्रहे लक्ष्यते। गर्भाधानसंस्कारमाध्यमेन गर्भसम्बन्धीयदोषा: नश्यन्ति क्षेत्ररूपिण्या: स्त्रिया: संस्कारोऽपि अनेनैव भवति। गर्भाधानसंस्कारादनन्तरं पुत्रोत्पत्तये पुंसवनकर्मण: आयोजनं क्रियते । गर्भाधानकर्मवत् सीमन्तोन्नयनस्यापि फलं भवति। मातु: गर्भे गर्भाम्बुपानजन्यदोषनाशाय जातकर्मसंस्कार: क्रियते। बहिनिष्क्रमणकर्मणि भगवत: सूर्यदेवस्य समन्त्रकदर्शनेन आयुषा सह लक्ष्म्या: वृद्धि: जायते। मातु: गर्भे मलभक्षणजन्यदोषा: अन्नप्राशनकर्मणि नश्यन्ति। बलायुतेजोबृद्धि: चूडाकर्मसंस्कारस्य फलम्। द्विजत्वसिद्धये वेदाध्ययनयोग्यताप्तये च उपनयनमनुष्ठीयते। विवाहादनन्तरमग्निहोत्रादिमाध्यमेन स्वर्गप्राप्ति: तथैव ब्रह्मविवाहफलेन सुपुत्रो जायते। तेन पितृणां कार्यं सम्पादितं भवति। एतदेव विवाहकर्मण: फलम्।

निषेकात् वैजिकं चैनो गार्भिकञ्चापमृज्यते।
क्षेत्रसंस्कारसिद्धिश्च गर्भाधानफलं स्मृतम् ।।
गर्भाद् भवेच्चपुंसूते: पुंस्त्वस्य प्रतिपादनम्।
निषेकफलवज्ज्ञेयं फलं सीमन्तकर्मण:।।
गर्भाम्बुपानजो दोषो जातात् सर्वोऽपि नश्यति।
आयुर्वर्चोऽभिवृद्धिश्च सिद्धिर्व्यवहृते स्तथा।।
नामकर्मफलं त्वेतत् समुद्दिष्टं मनीषिभि:।
सूर्यावलोकनादायुरभिवृद्धिर्भवेद् ध्रुवा।।
निष्क्रमादायु: श्रीवृद्धिरप्युद्दिष्टा मनीषिभि:।
अन्नाशनान्मातृगर्भमलाशादपि शुद्ध्यति ।।
बलायुर्वर्चोवृद्धिश्च चूडाकर्मफलं स्मृतम्।
उपनीते: फलं त्वेतद् द्विजतासिद्धिपूर्विका ।।
वेदाधीत्याधिकारस्य सिद्धि: ऋषिभीरीरिता:।
पत्न्या सहाग्निहोत्रादि तस्य स्वर्ग: फलं स्पुटम्।
ब्रह्माद्युद्वाहसम्भूत: पितृणां तारक: सुत:।
विवाहस्य फलं त्वेतद् व्याख्यातं परमर्षिभि:।।[2]

वस्तुत: कस्यापि पुरुषस्य परीक्षायां तस्य स्वभावो ह्येव विद्वद्भि: परीक्षन्ते । यतो मानवस्य स्वभावमाध्यमेन तस्य अन्तर्निहिता चिन्ताशक्ते: प्रकाश: जायते। मानवस्य चरित्रपरीक्षायां न केवलं तेन

संपादितस्य बृहत् कार्यस्य परीक्षणं कर्त्तव्यं यत: मूर्खोऽपि कालवशात् कदाचित् समाजोपयोगिकार्यसम्पादनेनात्मानं प्रतिष्ठापयति। अत: एव मानवस्य साधारण कार्यमेव परीक्षणीयं येनैकस्य महापुरुषस्य वास्तविकं चरित्रं प्रकटितं स्यात्।

स: एव महामानवो यस्य चरित्रं सदैव सुखदु:खेषु समम्। मानवस्य वैयक्तिकविकासाय चरित्रं परमावश्यकं,सच्चरित्रविकास: संस्कारमाध्यमेनैव विदधाति मानव:। संस्कारहीनं किमपि द्रव्यं समाजे आदृतं नेव भवति। यथा जनै: अन्नरोटिकादय: भोजनार्थं सादरं स्वीक्रियन्ते न तथैव तेषां पूर्वावस्था: व्रीहियवादय: आदृता: भवन्ति। व्रीहियवादय: यदा उत्तमसंस्कारै: संस्कृता: भवन्ति तदा समाजे तेषामादर: वर्द्धते। अपि च रत्नानि यदा भूगर्भत: नि:सरन्ति तदा अनेकेषु दोषेषु दुषिता: सन्ति प्रथमत: रत्नपरीक्षका: तेषां सम्यक् परीक्षणं विधाय तेषु विद्यमानान् मलान् निवारयन्ति। तत: मार्जनघर्षणच्छेदनादिभि: तेषां सौन्दर्यं वर्द्धयन्ति। तदन्तरं तेषां रत्नानां मूल्यवृद्धिश्च जायते। जना: तान् सादरेण च शिरसि धारयन्ति। एवं प्रकारेण शिशु: यदा मातु: गर्भादुत्पद्यते तदा बहुविधै: प्रारब्धसंञ्चितकर्मरूपदोषै: संयुक्तो भवति। तेषां दोषाणां व्यपोहनाय अस्माकं संस्कृतौ शोडषसंस्काराणां व्यवस्थास्ति। यथा संस्कारेण संस्कृतानां द्रव्याणां मूल्यमधिकं जायते तथैव संस्कारेण संस्कृतानां मानवानामादर: सर्वत्र दृश्यते। अत एव अस्माकं संस्कृतौ शोडषसंस्कारणां प्राधान्यं स्वीकृतमस्ति। गर्भाधानसंस्कारादारभ्य अन्त्येष्टिपर्यन्तं संस्कारा: सन्ति । तेषां महत्त्वं मानवस्य वैयक्तिक विकासे अध्ययने च सर्वथा अनुभूयते। प्रसङ्गदृष्ट्या येषां महत्त्वं प्रधान्येन बाहुल्येन च अध्ययनक्षेत्रे दृश्यते तेषामालोचनं मयाध: क्रियते।

गर्भाधानम्

गर्भाधानं षोडशसंस्कारेषु प्रथमसंस्काररूपेणानुष्ठीयते। हिन्दुशास्त्रेषु अनेनैव कारणेन गर्भाधानसंस्कारस्य व्यवस्थाकृतास्ति। येन पितरौ सावधानतया धर्मानुष्ठानेन सह गुरुजनानामनुमत्या योग्यसन्तत्युत्पत्तये समर्था: स्यु: । वक्तव्यमिदं बहुविधै: पुराणकथानकै: सर्वर्था सिद्धं जातम्। गर्भाधानसमये पतिपत्न्यो: हृदये यथा वासना विचारश्च भवति तथैव सन्तानस्योत्पत्ति: भवति। प्रसङ्गेऽस्मिन् महाभारतैका प्रसिद्धा कथा दृश्यते। यदा अर्जुनसुभद्रयो: मध्ये परिणयो जात: तद्दिनादारभ्य सुभद्रा अर्जुनस्य वीरत्वं तस्य युद्धकौशलं युद्धप्रकारविषये च सर्वदा पृच्छति स्म। गर्भाधानसमये मातु: सुभद्राया: एतादृशस्वभावेन तस्या: आत्मज: अभिमन्यु: गर्भावस्थायामेव विशेषेण प्रभावितो अभवत्। युद्धविद्यां प्रतिमातु: आग्रहवशात् बाल्यादेवाभिमन्यु: युद्धविद्यानिपुणो जात:। महाभारतयुद्धस्य विषमे संकटमयस्थितौ अपि तरुण: अभिमन्यु: आत्मन: वीरत्वं धैर्यमपरित्यज्य द्रोणाचार्यस्य चक्रव्युहभेदने मतिं चकार। महाभारतयुद्धे तस्य वीरत्वं साफल्यञ्च सर्वजनविदितम्। एष: एव गर्भाधानसमये मातु: पितुश्च मानसिकसंस्कारस्य महत्फलम्। महाभारतस्य द्रोणपर्वणि युधिष्ठिरं प्रति अभिमन्यो: वचनमिदं तस्य वीरत्वं शौर्यत्वं च प्रतिपादयति।

द्रोणस्य दृढमत्युग्रमनीकप्रवरं युधि।

पितृणां जयमाकाङ्क्षन्नवगाहेऽविलम्बितम्।।
उपदिष्टो हि मे पित्रा योगोऽनीको विशातने ।
नोत्सेहे हि विनिर्गन्तुमहं कस्यां चिदापदि।।[3]

एवमपि पुराणे अपरैकाकथा दृश्यते एकदा भगवत: श्रीकृष्णस्य पत्नी जाम्बवती प्रद्युम्नवत् शूरवीरपुत्रकामयमाना श्रीकृष्णमुक्तवती प्रभो! प्रद्युम्न इव बलविद्यायुक्तपुत्रस्य माता कथं भविष्यामि इति। तदा तस्या: वचनमाकर्ण्य भगवता श्रीकृष्णेन प्रोक्तं यत् प्रद्युम्नाय ऋक्मिण्या सह द्वादशवर्षपर्यन्तं नैष्ठिकब्रह्मचर्यपूर्वकं व्रतमाचरितम्। यदि त्वं तथैवाचरिष्यति तर्हि तव पुत्रोऽपि प्रद्युम्नवत् भविष्यति। श्रीकृष्णस्य वचनानुसारं जाम्बवती व्रतमाचरितवती। तदनन्तरं सा वीरयोद्धृषु श्रेष्ठकुमारं शाम्बमजनयत्। एवमपि राज्ञ: पण्डो: महिषी कुन्ती राज्ञा पण्डुना सहारण्ये वासपूर्वकं सर्वदा धर्मवीरकर्त्तव्यपरायणशास्त्रविशारदानां देवानां चिन्तने पूजायां च तत्परा सती युधिष्ठिरभीमार्जुनादीनां धर्मज्ञानवीरकर्मशास्त्रविशारदानां विद्यावतां च पुत्राणां जननी जाता परं सदा

मन्दबुद्धौ प्रवृत्त: धृतराष्ट्र: शतमूर्खाणां जनको जात:, एवं असुरराजस्य कंसस्य माता स्वकीय मन्दबुद्ध्या कंस इव पुत्रमजनयत्। एभि: प्रमाणै: आत्मा वै जायते पुत्र: इति आप्तवाक्यं सिद्धिमधिगच्छति। मातु: पितु: च आत्मैव सुक्ष्मशरीरात् पुत्रत्वेन अवतीर्यते इति शास्त्रधारणया मन्तुं शक्यते। अतो गर्भाधानसमये उभयो: हृदि या भावना सम्यक् वरीवर्त्तते सैव भावना शिशो: नैतिक-बौद्धिकविकासे कारणं भवति। पूर्वाचार्यैरिदमेव तथ्यमङ्गीकृत्य गर्भाधानस्य मौलिकतथ्यानां गर्भधारणयोग्यता कालस्वभावचिन्तनानामुपरि च व्यापकरूपेणालोडनं कृतम्। अतो गर्भधारणसमये संस्कारिताचारव्यवहारस्य पालनाय धार्मार्थिकामप्रतिपादकानां कर्मणामनुष्ठानाय पूर्वाचार्यैरुपदिष्ट:। कामभावापन्ना: मातापितरौ मिथ: कामभावसम्पन्नान् पुत्रान् जनयन्ति। दिव्यौदार्यभावपरायणा: उदारतास्तिक्यबुद्धिसम्पन्नधर्मज्ञानरता: परोपकारिण: सर्वभूतहितेरताश्चेह परलोके सुखदायी पुत्रान् जनयन्ति। अत: शास्त्राकाराणां निष्पत्तिरस्ति गर्भाधानसमये पितृभि: सदा सत् पुरुषाणां चरितं वीरौदार्यसत्वगुणसम्पन्नानां देवानां चरितञ्चाप्यवश्यमेव चिन्तनीयम्। इदमेवोद्देश्यं पुरस्कृत्य पूर्वाचार्यै: पितॄन् देवभावसम्पन्नम् आस्तिक्योदार्य भावसम्पन्नं च कारयितुं कालेऽस्मिन् विभिन्नदेवदेवीनां पूजनं कर्त्तुं प्रचोदितम्। गर्भाधानकर्मणि मन्त्रमिदं पठ्यते।

ॐपुषा भगं सविता मे ददातु रुद्रा: कल्पयन्तु ललाम गुम्। ॐ विष्णुर्योनि कल्पयतु त्वष्टारूपाणि पिशंन्तु। आसिञ्चन्तु प्रजापति धातागर्भं दधातु ते।[4]यस्यार्थो भवति सूर्य्यरुद्रौ योनि: कल्पयतां विष्णु: गर्भधारणाय स्थानं ददातु, त्वष्टारूपस्य संयोजनं करोतु प्रजापति: गर्भं सिञ्चतु सुष्टिकर्त्ता गर्भगठनं करोतु । प्रायत: अस्मिन् कर्मणि प्रयुक्ता: वैदिकमन्त्रा: विद्याधिष्ठातृदेवदेवीनां चिन्तनाय उद्बोधयन्ति। गर्भाधानसमये स्त्रीपुमांस: यादृशी भावनया भाविता: भवन्ति तस्या: प्रभावो रजवीर्योपरि पतति फलत: तादृश सन्तानस्योत्पत्तिरपि जायते इति सुश्रुतसंहिताया: शरीरस्थाने प्रोक्तमस्ति।

आहारचेष्टाभिर्यादृशीभि: समन्वितौ।
स्त्रीपुंसौ समुपेयेतां तयो: पुत्रोऽपि तादृश:।।[5]

एभि: प्रमाणै: साधयितुं शक्यते गर्भाधानसंस्कार: अध्ययनेऽत्यन्तमहत्त्वपूर्णः अस्ति। यदि जन्मदातार: गर्भाधानसमये विद्याया: महत्वं स्वीकृत्य ज्ञानगरिम्णायुक्तस्य पुत्रस्योत्पादनाय अध्ययनेऽध्यापने च मन: दास्यन्ति तर्हि तेभ्यो समुत्पन्नशिशोरपि बाल्यकालादेवाऽध्ययने रति: स्यात्।

पुंसवनं सीमन्तोन्नयनञ्च -

संस्कारेषु पुंसवनं द्वितीयस्थानमलङ्करोति एवं च तृतीयसंस्काररूपेण सीमन्तोन्नयनमनुष्ठीयते। उभौ संस्कारौ प्रायत: गर्भरक्षायै भवत:। गर्भाधानस्य तृतीयचतुर्थे मासि गर्भनाशस्य प्राबल्यता जायते। एषा आशङ्का षष्ठाष्टममासं यावत् वरीवर्त्तते। अतो सावधानतया गर्भिण्या: रक्षायै द्वौ संस्कारौऽनुष्ठीयेते। गर्भाधानादारभ्य चतुर्थमासं यावत् भृणस्य लिङ्गनिरूपणं काठिन्यम्। अतोऽस्मिन्नेव समये पुंसवनं करणीयमिति विधिरस्ति। अस्मिन्कर्मणि वटवृक्षस्याङ्कुरान् कुशमूलान् च घर्षयित्वा गर्भिण्या: दक्षिणनाशापूटे आघ्रपयन्ति। समयेऽस्मिन् पुत्रप्राप्तिकामनया मन्त्रमिदं पठ्यते।

ॐ हिरण्यगर्भ: समवर्ततात्रे भूतस्य जात: पतिरेक आसीत्।
स दधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम।।[6]

अस्योपाङ्गरूपेणानवलोभनसंस्कार: अनुष्ठीयते यस्य मूलोद्देश्यं केवलं गर्भरक्षा एवास्ति। पुराणेषु पुत्रलाभाय पुंसवनव्रतमिति व्रतविशेषस्य वर्णनं दृश्यते। श्रीमद्भागवते षष्ठेस्कन्धे १८-१९ अध्याययो: उल्लिखितमस्ति यत् महर्षिकश्यपस्याज्ञया दैत्यमाता दिति: इन्द्रवधक्षम: पुत्रप्राप्तये व्रतमिदं चकार। एवं मत्स्यपुराणेऽपि एषा कथोपलभ्यते। मोक्षोपयोगी स्वस्थशरीरप्रदानं च संस्कारस्यास्य मूललक्ष्यमस्ति। विद्योपार्जनाय स्वस्थशरीरस्य महति आवश्यकताऽस्ति। अतो अध्ययने अस्य संस्कारस्य महत्त्वमनुभूयतैव। सीमन्तोन्नयनकर्मणि गर्भिण्या: प्रसन्नतायै तां सज्जयन्ति सुगन्धसेवनमेव पतिसहवासं च वारयन्ति । कर्मण्यस्मिन् गर्भिण्या: पति: ॐ भू:

विनयामि ॐ भूव: विनयामि ॐ स्व: विनयामि इत्यादिमन्त्रान् पठित्वा पत्न्या: सीमन्तमुन्नयति। साधारणतया गर्भाधानस्य चतुर्थे मासि तत: परं वा गर्भस्थभृणस्य अङ्गप्रत्यङ्गादीनां निर्माणं चेतनाशक्ते: विकासेन सह इच्छाशक्तेरपि विकासो जायते। समयेऽस्मिन् गर्भिणीं प्रति उत्तमशिक्षा उपदेशश्च कर्त्तव्य: एवं च तस्यै उत्तमभोजनमपि देयम्। यथा तस्या: मानसं प्रमुदितं स्यात् तथैव कार्यमपि करणीयम्। सद् ग्रन्थादीनामध्ययनमध्यापनेन तेषु प्रतिपादितविषयाणां चिन्तनेन गर्भस्थशिशो: चेतनाशक्ति: सिञ्चिता भवति। येन शिशो: उत्पत्तेरनन्तरं बाल्यकालादेव शास्त्रप्रतिपादित कर्म प्रति तस्य श्रद्धाविश्वासश्चापि जायते। आश्वलायनगृह्यसूत्रे चतुथमासि सीमन्तोन्नयनं कर्त्तव्यमिति उक्तमस्ति। **चतुर्थे गर्भमासे सीमन्तोन्नयनम्** (१/१४/१२) पुराणेष्वपि अस्य संस्कारस्य महत्त्वं बहुश: कीर्त्तितमस्ति। भक्तप्रवरस्य प्रह्लादस्य गर्भवाससमये तन्माता कयाधु: देवर्षिनारदेन विष्णुभक्तिविषये प्रचोदिता तेन गर्भस्थशिशु: प्रह्लादोऽपि प्रचोदित: सन् महान् विष्णुभक्त: सर्वगुणसम्पन्नोऽजायत इति श्रीमद्भागवते उल्लिखितमस्ति। स्वयं प्रह्लाद: मातृगर्भस्मृतिं एवं तत्र विवृणोति एकदा हिरण्यकशिपु: तपस्यायै मन्दराचलं प्रति जगाम । एतस्मिन्नवसरे देवा: उपयुक्तसमयोऽयमिति मत्वा हिरण्यकशिपो: नगर्यामुपर्याक्रमणं चक्रु:। ते असुरसैन्यान् पराजित्य लुण्ठनमकुर्वन्। तस्मिन्नेव समये मम मातरं कयाधुं इन्द्रो जग्राह। इन्द्रेण बलादाकृष्य नीयमाना मम माता कुररीव क्रन्दितवती । कालेऽस्मिन् पथि देवर्षिनारदेनावलोकित:। अबलाया: अपहरणं सदा गर्हितमिति नारदवचनं यदा श्रुतवान् तदा इन्द्रेणोक्तं अस्या कयाधो: गर्भाम्बुधौ हिरण्यकशिपो: वीर्यरूपमविसह्यं विषमस्ति। यदा तस्य जन्म भविष्यति तं विनश्यैनं त्यक्ष्यामि। तदा नारदेण विहस्योक्तं अस्या: गर्भाम्बुधौ भगवत: परमभक्तशिरोमणि: निवसति त्वं तं मारयितुं सर्वथा असमर्थ:। अतो एनामनिन्दितां त्यज। देवर्षे: वचनानुसारमिन्द्र: मातरं कयाधुं तत्याज। तदनन्तरं देवर्षि: मातरं स्वाश्रमं प्रति नीतवान्। स तत्र तामनिन्दितां प्रत्यहं भागवतधर्मान् प्रोवाच। अस्मिन् समये सर्वदा ममोपरि तेषां महानुभावानां दृष्टिरासीत्। अतो तेन यदुपदिष्टं तत्सर्वं गर्भावस्थायामेव मम स्मृतिपथारूढो जात:। परं स्त्री हेतौ तथातीवप्राचीनहेतौ मम मातु: विस्मरणं गतम्।[7] एवं छत्रपतिशिवाजीमहोदयानामपि जीवदशाया: अध्ययने बाल्यावस्थायामेव तस्य संस्कारोऽजायतेति भाति। प्राचीनकाले सीमन्तोन्नयनसंस्कारकर्मणि विभिन्ननृत्यगीतानामायोजनं गर्भिण्या: प्रमोदायैवाऽकुर्वन्। तत्र गायने भक्त्युत्पादकानां गीतानां गानमभवत्। येन शिशो: मनसि भक्तिरसस्योद्रेक: स्यात् । एवं सीमन्तोन्नयनमध्ययनाय अतीव महत्वपूर्णमिति शास्त्रै: प्रतिपादितम्।

जातकर्मसंस्कार: -

सीमन्तोन्नयनादनन्तरं जातकर्मानुष्ठीयते। अस्मिन् गर्भस्थशिशु: गर्भादुत्पन्ने सति तस्य दीर्घजीवनाय ज्ञानाभिवर्धनकामनया च वैदिकमन्त्रमाध्यमेन कार्यमिदं सम्पाद्यते। वैदिकमन्त्रेषु अनिर्वचनीया: शक्तय: विद्यमाना: सन्ति। मुनयोऽस्माकं तेषां मन्त्राणामनुभवं कृत्वैव लोककल्याणाय तत्प्रयोगार्थं प्रोक्तवन्त:। जातकर्मसंस्कारसमये स्वार्भकस्यायुष्यकरणाय मन्त्रमिदं पठ्यते।

ॐ अग्निरायुष्मान् सवनस्पतिभिरायुस्माँस्तेन त्वाऽऽयुष्मन्तं करोमि।

अग्निसोमब्रह्मादयोदेवा: अमरा: तेषां पुन: पुन: स्मरणेन शिशो: अन्तकरणे संस्कारा: आपतन्ति। उक्तसंस्कारस्य प्रभावेणैव कालेन तत् कर्म सम्पादने सोऽपि व्रती भविष्यति। जातकर्मणि पिता स्वपुत्रं सुवर्णद्वारा मधु आदयति। कालेऽस्मिन् यन्मन्त्रं पठ्यते तस्यार्थो भवति अन्नमेव प्रजा आयुरमृतरूपोऽस्ति तत् त्वयि प्राप्तिरस्तु। मित्रावरुणौ मेधाशक्तिं ददातु अश्विनौ मेधां ददातु बृहस्पति: तुभ्यं मेधाशक्तिं ददातु इत्यादि। अधुना संस्करा: प्रायश: लुप्ता: एव। वैज्ञानिके युगेऽस्मिन् भोतिकवादिभि: प्रायत: अशाश्वतेषु द्रव्येषु विश्वासं संस्थाप्य संस्कारा: नाद्रीयन्ते। अस्माद्धेतौ सम्प्रति समाजे क्षीणायुषा: अल्पबुद्धय: मानवा: सम्भवन्ति। जातकर्मसंस्कारस्य तात्पर्यमिदमस्ति अस्मिन् बालकस्य दीर्घायुष्याय तीव्रबुद्ध्युत्पादनाय च वैदिकमन्त्राणां प्रयोग: विधीयते। विद्याध्ययनाय धीमतां बालकानामेवावश्यकं तथैव दीर्घजीविप्रज्ञावतां पुरुषाणां माध्यमेन देशस्य समाजस्य आत्मनश्च महती उन्नति:

साधिता भवति एवं रुग्णाल्पायुदुरात्मभि: राष्ट्रस्य समाजस्य च नैतिकावक्षयो जायते। अतो अध्ययनेऽस्य संस्कारस्य महत्वं विद्यते एव।

नामकरणसंस्कार: तन्महत्वञ्च -

नम्यन्ते अभिधीयन्ते अर्थोऽनेन इति नाम अर्थात् येन शिशो: नाम्न: अर्थाभिज्ञानं जायते तन्नामेति अभिधीयते। धरापृष्ठे अवतरितजीवानां पृथगस्तित्वविज्ञानाय नाम्न: स्वतन्त्रप्राधान्यं विद्यते। नाम विना वस्तु विद्यमानेऽपि स्पष्टज्ञानं न स्यात्। अस्य महत्त्वं रामचरितमानसे इत्थं वर्णितमस्ति।

रूपविशेष नाम विनु जाने करतलगत न परहि पहिचाने।
अगुन सगुन बिचनाम सुसास्वी उभय प्रबोधकचतुर दुभाषी।।[8]

सांसारिकजीवने व्यक्ते: परिचयदानाय नामकरणस्य परमावश्यकता अनुभूयते। मानवस्य संज्ञानिर्द्धारणमेव संस्कारितस्वरूपोऽस्ति अनेन संस्कारेण संस्कारितस्य आयु: तेज: व्यवहारसिद्धिश्च जायते अतोऽस्य मनीषिभि: प्रयोग: विहित:। नामकरणद्वारा अमृततत्वस्य सिद्धि: अन्त: करणे बलवृद्धिश्च जायते। अत: नामकरणस्य माहात्म्यमनस्वीकार्यम्।

नामाखिलस्य व्यवहारहेतु: शुभावहं कर्मसु भाग्यहेतु:।
नाम्नैव कीर्त्तिं लभते मनुष्यस्तत: प्रशस्तं खलु नामकर्म।।[9]

अस्माकं पूर्वजै: नामकरणस्य महत्वविषये नाम्ना सह व्यक्ते: दिव्यसम्बन्धविषये चानुभावित:। प्रदत्ताभिधानं शिशो: व्यक्तित्वविकास: चारित्रिकविकास: आत्मोन्नते: परिप्रकाशकश्च यथा स्यात् तथैव कुर्वन्ति। नामकरणसमये विभिन्नशास्त्राणां माध्यमेन शिशो: भविष्यं सूक्ष्मरूपेण चिन्तयन्ति। तदनन्तरं गुणकर्मानुरूपं नामकरणं क्रियते। शास्त्रेषु वर्णव्यवस्थानुसारं नामकरणं कर्त्तव्यमिति प्रतिपादितमस्ति । नाम्न: स्मरणेन उच्चारणेन सर्वेषां प्रेरणाप्रदं च यथा स्यात् तथैव नाम कर्त्तव्यमित्यस्ति शास्त्रवचनम्।

शर्मेति ब्राह्मणस्योक्तं वर्मेति क्षत्रसंश्रयम्।
गुप्तदासात्मकं नाम प्रशस्तं वैश्यशूद्रयो:।।[10]

श्रीमद्भागवते गर्गाचार्येण भगवतो कृष्णबलरामयो: भाविकर्माणि चिन्तयित्वा तयो: नाम कृतवान्निति उल्लिखितमस्ति। नामानुसारं तौ विश्वविख्यातौ बभूवतु:। अतो शास्त्रेभ्यो ज्ञायते यत् नाम्ना सहास्ति व्यक्ते: सूक्ष्मसम्बन्ध: तस्मात् नामकरणसमये चारित्रिकविकासमभिलक्ष्य नामकरणं कर्त्तव्यम्। अतो अध्ययनेऽपि नामकरणस्य महत्वमनुभूयते।

अन्नप्राशनम् -

षष्ठसंस्काररूपेण षष्ठे मासि अन्नप्राशनं क्रियते। षष्ठेऽन्नप्राशनम् (पारस्करगृह्यसूत्रम्) अन्नस्य महत्त्वं सर्वतोऽधिकं वर्तते। श्रुतय: अन्नं व्रतरूपेण स्वीकुर्वन्ति। **अन्नं न निन्द्यात् तद् व्रतम्।** भारतीयसंस्कृति: स्वीकरोति **आहारशुद्धौ सत्त्वशुद्धि:। सत्त्वशुद्धौ ध्रुवास्मृति:। स्मृतिलम्भे सर्वग्रन्थिनां विप्रमोक्ष:।[11]** अर्थात् अन्नस्य शुद्धतायां मानवस्य शरीरशुद्धि: जायते। तस्मात् धारणावतीस्मृतिशक्तिर्जन्यते। स्मृतिलाभे हृदयग्रन्थिनां भेदो भवति तत: परं मोक्षस्याधिगमं करोति, मानवेन अन्नप्राशनं षष्ठे मासि क्रियते। शिशु: यथान्नं गृह्णाति तथैव तस्योपरि प्राभावोऽवश्यमेव पतति। सात्विकवृत्तौ लब्धधनं वीजरूपेण बालकाय सात्विकसंस्कारान् ददाति। ये यथान्नं गृह्णन्ति तदेव रसो भूत्वा तेभ्यो मिलति। तस्मात्तस्य मानसिकसंरचनाऽपि जायते। खाद्यपेयस्य प्रभावो शिशोरुपरि पतति इति आधुनिकानां मतम्। धर्मविज्ञाननामके ग्रन्थे पुत्रसन्तानस्य षष्ठाष्टमे मासि कन्यकायाश्च पञ्चमे सप्तमे मासि वा अन्नप्राशनकर्मानुष्ठीयते तथानेन खाद्यपदार्थस्य अन्नसंकरतादोषा: अपि निवार्यन्ते इति विचार: प्रदत्तोऽस्ति।[12]

मनुस्मृतौ कूर्मपुराणे च प्रोक्तमस्ति अन्नं ब्रह्मरूपोऽस्ति अत: एनं सर्वदा पूजयेत्। अन्नमनिन्द्य भोजनं कूर्यात्। सर्वदा अन्नं दृष्ट्वा हृष्येत् प्रसीदेच्च।

पूजयेदशनं नित्यमद्याच्चैतदकुत्सयन्।
दृष्ट्वा हृष्येत् प्रसीदेच्च प्रतिनन्देच्च सर्वदा।।[13]

धर्मधुरीणा: अन्नमेव सकलजीवानामाधार: अन्नदानं दानेषु श्रेष्ठमित्यामनन्ति। मातु: गर्भमलिनपदार्थानां भक्षणे जातदोषाणां निवारणाय अन्नप्राशनकर्मानुष्ठीयते। उपनिषत्सु अन्नब्रह्मेति प्रोक्तमस्ति। अन्नं कदापि न निन्देत् तदेव व्रतम्। श्रुतय: एवं स्तुवन्ति। हे ! अन्नतेजोरूपोऽसि त्वमेव विश्वस्यास्य जीवनम्।

तेजोऽसि तेजो मयि धेहि वीर्यमसि वीर्यं मयि धेहि बलमसि बलं मयि धेह्योजोऽस्योजो मयि धेहि मन्युरसि मन्युं मयि धेहि सहोऽसि सहो मयि धेहि।[14] श्रीमद्भगवद्गीतायामन्नसंस्कारस्य महत्वं तस्य यथा विधि: अनुष्ठानेन मानवस्य परमकल्याणं भवति इति सम्यक् सूचना प्रदत्ताऽस्ति। अत्र अन्नं मुख्यत: सात्विक-राजस-तामसभेदेन भागत्रयेण विभक्तं कृतमस्ति। तथैवात्र विविधा: गुणदोषा:अपि पृथक्त्वेन विवेचिता: सन्ति। यद् भोजनं स्वादु -स्निग्ध- -स्थिरगुणप्रदमनोहरं चास्ति तस्य भोजने आयु: सात्विकबुद्धि: शारीरिकबलमारोग्यं शारीरिकी मानसिकी च सुखानि प्रीतयश्च मिलन्ति।

आयु: सत्त्वबलारोग्यसुखप्रीतिविवर्द्धना:।
रस्या: स्निग्धा: स्थिरा हृद्या आहारा: सात्विकप्रिया:।।[15]

तथा च तत्रैव राजसतामसगुणसम्पन्नस्य संस्कारविहीनस्यान्नस्य भेददोषा: एवं प्रतिपादिता: सन्ति।

कट्वम्ललवणत्युष्णतीक्ष्णरूक्षविदाहिन:।
आहाराराजसस्येष्टादु:खशोकामयप्रदा:।।
यातयामं गतरसं पूति: पर्युषितं च यत्।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम्।।[16]

अध्ययनार्थं स्वस्थशरीरस्य आरोग्यता मन: प्रसन्नता आयुष्मतायाश्चास्ति परमावश्यकता । अतिभोजने शरीरे रोगा: समुत्पद्यन्ते। शास्त्रेषु अतिभोजनं निषिद्धमस्ति यतो हि अति भोजनम् अनारोग्यमनायुष्यं लोकविद्विष्टञ्चाप्यस्ति।

अनारोग्यमनायुष्यमस्वर्ग्यं चातिभोजनम्।
अपुण्यं लोकविद्विष्टं तस्मात् तत् परिवर्जयेत्।।[17]

संस्कृतान्नस्य भक्षणे बलं तथा च तेजसो वृद्धि: भवति इत्यस्ति शास्त्रप्रमाणम्। यथा

अन्नपतेऽन्नस्य नो देह्यनमीवस्य शुष्मिण:।
प्र प्र दातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पदे।
विश्वकर्मणे स्वाहा।[18]

एवं च

पूजितं ह्यशनं नित्यं बलमूर्जं च यच्छति।
अपूजितं तु तद्भूक्तमुभयो नाशयेदिदम्।।[19]

छान्दोग्योपनिषदि एका उक्ति: लक्ष्यते। भुक्तमन्नं त्रिषु भागेषु विभक्तं भवति। सर्वतो निकृष्टभाग: मलं भवति। मध्यभागे मेदसोत्पत्ति: सर्वोत्तमे च मनस: पुष्टि: जायते।

अन्नमशितं त्रेधा विधीयते तस्य य: स्थविष्ठो धातुस्तत्पुरीषं भवति यो मध्यमस्तनमाँसं योऽणिष्ठं स्तन्मन:। एवं च तत्रैवोक्तमस्ति यथा दध्न: मथने तस्य सारांश: उपरिभागमास्थाय घृतरूपं भजति एवमन्नस्य सूक्ष्मांशे मनस: निर्माणं जायते। **दध्न: सौम्यमथ्यमानस्य योऽणिमा स उर्ध्व: समदीषति तत् सर्पी भवति। एवमेव खलु सौम्यान्नस्याश्यमानस्य योऽणिमा स उर्ध्व: समुदीषति तन्मनो भवति।[20]** साधारण्येन लक्ष्यते अन्नभोजनं विना मन: शरीरञ्च दुर्वलं जायते। तस्मात् चिन्तनशक्ति: क्षीणा भवति एवं च तत् प्रत्यवायेन चिन्तनशक्ते: शारीरिकविकासश्च जायते। यदि अन्नं सात्विकादिभावापन्नं भवति तर्हि मन: सात्विकगुणेषु गुणितोऽपि भवति। एवं प्रकारेण अन्नेन सह मनस: दृढ़सम्बन्ध: शास्त्रेषु प्रतिपादितोऽस्ति । शिक्षा एका मानसिकीप्रक्रियास्ति। तत् कृते दृढ़मानसमतीवावश्यकम्। अतो प्राचीनकाले सात्विकभावापन्ना: पितर: अन्नं संस्कृत्य लोकशिक्षणाय

प्राथम्येन अन्नप्राशनकर्मणि शुद्धसात्विकाहारा: बालेभ्य: ददति। अनुमीयते प्राचीनभारतीयै: विद्योपलब्धये शोडषसंस्कारेषु अन्नप्राशनस्य महत्त्वमनुभूयैव मुक्तकण्ठेनोद्घोषितं तन्मे मन: शिवसंकल्पमस्तु।

चूडाकर्मसंस्कार: -

सप्तमसंस्काररूपेण चूडाकर्मास्माभिरनुष्ठीयते। संस्कारस्यास्य समय: मुख्यरूपेण प्रथमेऽथवा तृतीयेवर्षे भवति मुण्डनमेवास्ति अस्य मुख्यकार्यम्।

चूडाकर्मद्विजातीनां सर्वेषामेव धर्मत:।
प्रथमेऽब्दे तृतीये वा कर्त्तव्यं श्रुतिचोदनात्।।[21]

गर्भावस्थायां शिशो: शिरसि ये केशा: उत्पद्यन्ते तेषां निवारणपूर्वकं शिखाधारणमस्य संस्कारस्य मूललक्ष्यम्। शरीरविज्ञानदृष्ट्या अस्य संस्कारस्य महत्त्वमधिकं वर्तते। चरकेण स्वसंहितायां चूडाकरणस्य लाभविषये तथ्यमिदं प्रतिपादितम्।

पौष्टिकं वृष्यमायुष्यं शुचि रूपविराजनम्।
केशश्मश्रुनखादीनां कल्पनं संम्प्रसाधनम्।।[22]

अर्थात् क्षौरकर्मणि मानवस्य पुष्टि: वृष्यता आयु: पवित्रता सुन्दरतायाश्च वृद्धिर्जायते। कर्मण्यस्मिन् शिशो: मुण्डनानन्तरं तस्य शिरसि स्निग्धतैलादीनां प्रयोगं कुर्वन्ति। येन मस्तिस्कस्थितमज्जातन्तूनां कोमलता शीतलता शक्तिवृद्धिश्च भवति। येन बौद्धिकशक्ते: विकासश्च जायते।

शरीरविज्ञानानुसारं शिशो: दन्तोद्गमसमये शरीरे नानाविधा: रोगा: समुत्पद्यन्ते। येन तस्य शरीरं बलहीनं जायते। केशा: उन्मूलिता: भवन्ति। अत: दन्तोमसमये आर्या: चूडाकर्म कुर्वन्ति। शिखां परित्यज्य सम्पूर्णशिर: मुण्डनकरणे शिशो: शिरसि तापह्रासो जायते। समयेऽस्मिन् जायमाना: रोगा: अपि न भवन्ति केशा: वद्धमूला: भवन्ति च।

अस्माकं बुद्धि: सूर्यांशरूपोऽस्ति। अतोऽस्माकं संस्कृतौ प्रचलितासु उपासनासु सूर्योपासना अतीव महत्वपूर्णास्ति। सर्वदा मेधाशक्ते: विवर्द्धनाय गायत्र्यादिषु मन्त्रेषु सूय्र्योपासनमस्माभि: क्रियते। सूर्यांशभूता: बुद्धे: संरक्षणाय ऋषय: बौद्धिककेन्द्रमस्तकोपरि गोखुराकृति शिखाधारणाय उपदिशन्ति स्म। यत: कृष्णकायशिखाभूता: केशा: सूर्यतेजस: प्रकाशिनी शक्ते: विशेषाकर्षणं विधाय उर्ध्वमुखी बुद्धे: सञ्चयं कृत्वा सबलं कर्त्तुं सहायका: भवन्ति। योगशास्त्रस्य सिद्धान्तानुसारं शिरसि ब्रह्मरन्ध्र: ब्रह्मरन्ध्रस्य उपरिभागे सहस्रदलयुक्तं परमात्मन: केन्द्रस्थानमस्ति। चिकत्साविज्ञानानुसारं शिरस: पृष्ठभागे Braincell अस्ति। अत: अस्मिन्नंशे घनकृष्णकाया: केशा: यदि स्यु: तर्हि मानवस्यात्मिकशक्ते: सुरक्षा भविष्यति। इदमेवोद्देश्यं पुरस्कृत्य आर्या: शिखावन्धनं कुर्वन्ति। पाश्चात्य विदुषा VICTOR .F. CROMER एकस्या: ओजशक्ते:आविष्कारः कृतः। विषये एवं तेन लिखितम्-

"In meditation one receives the vrillic influx' While concentrating one pours it out. If one, however, concentrates one's mind upon God there is an outgoing and an inflowing process set up. The concentration of the mind upwards sends a rush of this force through the top of the head and the respons comes as a fine rain of soft magnetism. These two forces cause a beautiful display of color to the higher vision. The out pouring from above is beautiful beyond description." [23]

सर्वदा शिखाया: वन्धने उन्मोचने च मानवानां सहस्रदलकमले ध्यानलग्न: भवति। येन परमात्मनि दृढा चिन्ता जायते। चूडाकरणमुर्ध्वाकर्षणयुक्तस्य ज्ञानस्य सञ्चयने अतीव महत्त्वपूर्णस्थानमलङ्करोति। अत: अध्ययनेऽस्य संस्कारस्य गौरवमनुभूयते एव। चौलकर्मानन्तरं षष्ठसंस्काररूपेण कर्णवेधसंस्कार: अनुष्ठीयते। शरीरस्य

रक्षानिमित्तं कर्णयो: भूषणधारणाय च अस्यायोजनं प्राचीनकाले क्रियते स्म। रक्षाभूषणनिमित्तं बालस्य कर्णौ विध्यते। (सुश्रुत सूत्रस्थानम् १६/१)। कर्णवेधकरणे अन्त्रवृध्यादिरोगा: नोत्पद्यन्ते इति सुश्रुतसंहितायामुल्लेख: दृश्यते।

शङ्खोपरि च कर्णान्ते त्यक्त्वा यत्नेन सेवनीम्।
व्यत्यासाद्वासोरां विध्येदन्त्रवद्धिनिवृत्तत्तये।।[24]

स्वास्थ्यसंरक्षणमेवास्य संस्कारस्य मूललक्ष्यम्,अत: अध्ययनेऽस्य संस्कारस्य प्राधान्यं विद्यते एव। चूडाकर्मसंस्कारात् परम् अक्षरारम्भसंस्कार: अनुष्ठीयते। अस्य संस्कारस्य काल: गर्भात् पञ्चमे वर्षे भवति। **प्राप्तेऽथपञ्चमे वर्षे विद्यारम्भं तु कारयेत्।** अस्मिन् नवजातकेभ्य: अक्षरशिक्षा दीयते।

उपनयनसंस्कार: -

उपनयनसंस्कार: विद्याध्ययनस्य प्रथमसोपानमस्ति। इत: पूर्वं विषयेऽस्मिन् साङ्गोपाङ्गो विवेचनं कृतम्। विद्याध्ययनाय एष: संस्कार: प्रथमिकयोग्यतारूपेण गणितो भवति। उपनयनस्य तत्त्वज्ञानमतीव रहस्यपूर्णमस्ति। अनेन मानवा: ब्रह्मचर्यसत्यज्ञानसदाचारसच्छिक्षाया: अध्यात्मिकोन्नतेश्चोपाया: प्राप्नुवन्ति। गुरुशिष्ययो: भावात्मकमिलनमेव शिक्षाया: प्रथमसोपानम्। उपनयनं गुरुशिष्ययो: मध्ये अन्तरङ्गभावं स्थापयति। येनाभिप्रेरित: गुरु: शिष्यस्य हृदये स्वहस्तं स्थापयित्वा कथयति- **मम व्रते ते हृदयं दधामि। मम चित्तमनुचित्तं ते अस्तु मम वाचमेकमना जुषस्व बृहस्पतिष्ट्वा नियुनक्तु मह्यम्।**[25]

अर्थात्- लौकिकवैदिकशास्त्रज्ञानाय वेदव्रतविद्याव्रतेति व्रते द्वे तव हृदये स्थापयामि। तव चित्तं मनो वा मम ज्ञानान्तकरणमनुसरतु, अर्थात् यथा उपदेक्ष्यामि तथैव तव चित्तं गृह्णातु। मम वचनमेकमन: श्रुणु बुद्धे: सर्वासां विद्यानां च अधिकारी बृहस्पति: मम विद्यासु त्वां नियुनक्तु। उपनयनसंस्कारसमये यानि यानि कार्याणि क्रियन्ते तेभ्योऽपि प्रतीयते अध्ययने उपनयनस्य महत्त्वमधिकमिति। उपनयने सर्वादौ अग्निवायुसूर्यादीन् देवान् साक्षीरूपेण स्थापयित्वा अध्ययनसमृद्धिसदाचाराय गुरुशिष्यौ उभौ वचनवद्धौ भवत:। तदनन्तरं शिष्य: गुरवे निवेदयति ब्रह्मचार्योऽस्मि शिष्यत्वेन मामनुगृह्णन्तु। तदनन्तरमुभौ तृप्तिसूचकं जलाञ्जलिं गृहीत्वा आचार्य: शिष्यमात्मगतं कर्त्तुं देवान् प्रार्थयति। तदनन्तरमुभौ जलाञ्जलिमेकस्मिन् स्थाने त्यजन्ति। गुरु: पुन: शिष्यं कथयति अग्निसविता- अर्यमा: तव हस्तौ धृत्वा शिष्यत्वेन गृहीतवन्त:। एष: अग्निदेव: तव आचार्योऽस्ति। तथा च त्वमसि मम प्रियसखा सूर्यस्यावर्त्तनानुसारं मम प्रदक्षिणं कुरु। एवमुक्ते ब्रह्मचार्यपि गुरो: प्रदक्षिणां करोति। तदनन्तरं गुरु: शिष्यस्य नाभिकमलं स्पृष्ट्वा कथयति - हे नाभे! त्वं स्थिरो भव। हे अन्तक! तुभ्यमेनं समर्पयामि हे वायु-सूर्याग्निप्रजापतय:! युष्मभ्यमपि एनं समर्पयामि। एष: जरामरणरहित:भवतु। उपनयनकाले गुरुशिष्यस्यारोग्यार्थं देवान् एवं स्तौति। अनेन गुरुशिष्ययो: अन्तरङ्गसिद्धि: जायते। गुरुशिष्ययो: आन्तरिकसम्बन्धेनैव शिक्षाया: परिसरो विकसितो स्यात्। यथा खनित्रेण पृथिव्या: खननेन भूमिगतं तोयं लभते, तथैव गुरुशिष्ययो: दृढसम्पर्केण अत्यन्तगोप्यतमापि विद्या प्राप्स्यते। गुरुशिष्ययो: मध्ये सम्बन्धस्थापनाय उपनयनं सेतुमिवास्ति। गुरुशिष्ययो: सम्बन्धं विना अधितापि विद्या विफला स्यात्। एवं विद्याध्ययने उपनयनस्यापि महत्त्वं दरीदृश्यते।

मेधाजननं वेदारम्भश्च -

वेदाध्ययनात् प्राक् मेधाजननानाम्नाप्येकोमुपसंस्कार: अनुष्ठीयते। विद्यार्थिनां मेधा प्रज्ञा विद्यां प्रति श्रद्धोत्पादनमस्य संस्कारस्य मूललक्ष्यम्। अनेन संस्कृतानां विद्यार्थिनामध्ययने काऽपि वाधा न समुत्पद्यते इति भारतीयानां विश्वास:। अत: परं गुरु: शिष्येभ्य: वैदिकशिक्षादानाय तेषां ब्रह्मव्रतसंस्कारं कारयति। वेदानां तत्वज्ञानाय अस्य संस्कारस्यास्ति परमावश्यकता अस्मिन् उपनीतब्रह्मचारी ब्रह्मचर्यधारणपूर्वकं परमात्मन: पथि अग्रेसरोभवितुं प्रतिज्ञां करोति। अतोस्य नाम ब्रह्मव्रतमित्यजायत। ब्रह्मव्रतसंस्कारे संस्कृतविद्यार्थिनां

वेदारम्भसंस्कार: क्रियते। अस्यापरं नाम वेदव्रतमस्ति। ज्योतिशास्त्रोक्तविधिना शुभे दिने मुहूर्त्ते च अस्यानुष्ठानं जायते। अस्मिन् विद्यार्थिन: स्वशाखानुसारं प्रथमत: वेदाध्ययनं कुर्वन्ति। यस्य शिशो: यस्मिन् कुले परम्परायां वा जन्म स तामेव परम्परामनुसृत्य वेदाध्ययनरतो भविष्यति इति वसिष्ठस्याभिमतम्।

पारम्पर्यागतो येषां वेदे सपरिवृङ्हण:।
यच्छाखा कर्म कुर्वीत तच्छाखाध्ययनं तथा।।

यदा ब्रह्मचारिण: वेदाध्ययनं पूर्णतामेति तदा तेषां गुरुकुलैव केशान्तसंस्कारः अनुष्ठीयते। अनन्तरं ते स्मशृदण्डमजिनमेखलां च त्यक्त्वा समावर्त्तनकर्मणि प्रवृत्ता: भवन्ति। समावर्त्तनं विद्याध्ययनस्यान्तिमसंस्कार: विद्याध्ययनसमाप्तेरन्तरं ब्रह्मचारी गुरोराज्ञया गृहं प्रत्यागमनं करोति। अस्य विशदालोचनं मया प्रागैव विहितम्। समावर्त्तनं गृहस्थजीवने प्रवेशायानुष्ठीयते। अस्मिन् गुरव: विद्यार्थीभ्य: **सत्यं वद धर्मं चर स्वाध्यायान्मा प्रमद** इत्यादय: बहूपदेशा: ददति। शोडषसंस्कारेषु एते एकादशा: अध्ययने सम्बन्धा: सन्ति। एतेषामध्ययनेन एषा चिन्ता मनसि जायते संस्कारा: प्रतिमानवमाचारव्यवहारज्ञानं शिक्षयन्ति। स्वस्याचरणे व्यवहारे च मानव: पूज्यो भवति। सामाजिकजीवनयात्रायां मानवस्य ये शत्रव: मित्राणि च भवन्ति न तेषां जन्मजातप्रवृत्ति: शत्रुमित्ररूपास्ति। कश्चित् मानव: यदि एकस्य कृते शत्रु: भवति तर्हि सह्येवास्ति अपरेषां कृते मित्रम्। अत: शत्रव: मित्राणि च आचारव्यवहारे जायन्ते।

न कश्चित्कस्यचिन्मित्रं न कश्चित्कस्यचिद्रिपु:।
व्यवहारेण जायन्ते मित्राणि रिपव: स्तथा।।[26]

संस्कारा: मुख्यत: आचारव्यवहारं शिक्षयन्ति। व्यावहारिकज्ञानलाभ: एव शिक्षाया: वास्तविकं लक्ष्यम्। मानव: सर्वलक्षणयुक्तोऽपि यदि आचारहीन: तर्हि स किमपि मनोभिलषितं द्रव्यं विद्यां वा न प्राप्नोति अपरं तु नरकं प्रतिगच्छति। आचारवान् मनुष्य: सर्वदा स्वर्गलोके पूज्यते। इह लोके आचारवान् धन्य: लोकसुखावह: निरोगी च भूत्वा चिरकालं यावत् लक्ष्मीं भुङ्क्ते। अन्ते स: स्वर्गलोकं प्रति गच्छति। अत: उक्तमस्ति-

सर्वलक्षणयुक्तोऽपि नरस्त्वाचारवर्जित:।
न प्राप्नोति तथा विद्यां न च किञ्चिदभीप्सितम्।।

एवमपि विष्णुधर्मोत्तरपुराणे आचारवतां गौरवमुल्लिखितमस्ति।[27] विशेषत: संस्कारा: अस्मान् आचारव्यवहारज्ञानविषये शिक्षयन्ति। संस्काराणां सम्यगनुष्ठाने वयं कर्त्तव्यं प्रतिजागरुका: सन्त: असद्वृत्तं ज्ञास्याम:। सदाचारवतां मनुष्याणां मन: सर्वदा निर्मलं सत्वगुणयुक्तं च भवति। प्रत्येकेषु संस्कारपूर्णकार्येषु सदाचारिणां मन: रूपी सरोवर: सदा तरङ्गायितं भवति। यद्यपि मानससरोवरे कियत् कालानन्तरं तत् कार्यजन्यं कम्पनं नष्टं भजति तथापि शेषरूपेण संस्कारा: तिष्ठन्ति। एवं बहुकालानन्तरं ते एव संस्कारा: स्वभावेपरिणता: भवन्ति। कालक्रमानुसारमस्माकं मनसि या चिन्ताधारा जायते यानि कार्याणि वयं यथा कालं कुर्म: तेषु प्रत्येकस्य स्वतन्त्रस्थानमस्माकं मनसि स्थायिरूपेण तिष्ठति। तान्येव परवर्त्तिकाले चरित्ररूपेण प्रकाशितानि भवन्ति। मानव: जीवनस्य चरमलक्ष्यस्थलं प्राप्तुं अतीतसंस्काराणां माध्यमेनैव व्यावहारिकजगति प्रविशति स्वस्य प्रतिक्रियां प्रकाशयति च। अतो मानवजीवनस्य विकासाय संस्कारा: सोपानमिव कार्यं कुर्वन्ति। सर्वदा सिद्धिप्राप्तये मनस: एकाग्रताया: नितान्तप्रयोजनमस्ति। तथैव मनस: एकाग्रतायै संस्कारा: साधनरूपेण सन्ति। संस्काराणां मूलोद्देश्यं मुख्यत: त्रिविधं भवति। तत्रैकं दोषमार्जनम् द्वितीयमतिशयाधानं तृतीयं हीनाङ्गपूर्त्तिश्च। एतेषामुद्देश्यानां पूर्त्ति: हेतौ मानवस्यान्तिमलक्ष्यमोक्षप्राप्तये च द्वयो: विद्ययो: सम्यक् विकासाय विविधसंस्काराणां शास्त्रीयविधानं कृतम्। एतेषु संस्कारेषु गर्भाधानजातकर्मान्नप्राशनादिभि: मातृपितृरजोवीर्यजन्यदोषपरिमार्जनम् उत्तमगुणाधानं च क्रियते। उपनयनब्रह्मव्रतसमावर्त्तनादिषु अतिशयाधानं विवाह - अग्न्याधानादिसंस्कारेषु मानवजीवनस्य हीनाङ्गपूर्त्ति: भवति। अतो अध्ययने संस्काराणां महत्त्वमधिकतरमनुभूयते।

पादटीका -

1. मनु० २/२६-२८
2. धर्मविज्ञान पृ-१२८स्मृतिसंग्रहस्य उद्धृतश्लोका:
3.महा०द्रोण० ३५/१८-१९
4.ऋ अ ९/अ.२व.४२
5. सुश्रुत शरीर२/४६
6.यजु: १४/४
7.श्रीमद्भा ७/७
8.रा.च.मा. १/२१/५-८
9.कल्याणसंस्कारअङ्क पृ.२९७ वीरमित्रोदय सं प्र
10.वि.पु.३/१०/९
11.छा०उ०७/२६/२
12.धर्मविज्ञान पृ १३५
13.कूर्म पु० उ० वि०अ० १२/६१
14.यजुर्वेद:२१/८
15.गीता १७/८
16.गीता१७/९-१०
17. कू० पु०उ० वि०१२/६२
18.यजु:१२/८४
19.मनु०२ अध्याय:
20.छान्दोग्य: ६/५/१,६/६/१-२
21.मनु ०२/३५
22.चरक०सु०स्था०५/९९)
23.धर्मविज्ञान पृ १३८
24.सु० चिकित्सा०-१९/२४
25.यजुर्वेद:
26.हितोपदेश: मित्रलाभ:
27.*विष्णुधर्मोत्तर* २७१/१-४

सम्बिदाऽध्यापक:, पुराणेतिहासविभाग:
राष्ट्रियसंस्कृतसंस्थानम्,
श्रीसदाशिवपरिसर:,पुरी